শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৪

*শ্রীরামচরিতৱর্ণনম্*

গীর্ৱাণৈরর্থ্যমানো দশমুখনিধনং কোসলেষ্ৱৃশ্যশৃঙগে
পুত্রীযামিষ্টিমিষ্ট্ৱা দদুষি দশরথক্ষ্মাভৃতে পাযসাগ্র্যম্।
তদ্ভুক্ত্যা তৎপুরন্ধ্রীষ্ৱপি তিসৃষু সমং জাতগর্ভাসু জাতো
রামস্ত্ৱং লক্ষ্মণেন স্ৱযমথ ভরতেনাপি শত্রুঘ্ননাম্না॥ ১ ॥

কোদণ্ডী কৌশিকস্য ক্রতুৱরমৱিতুং লক্ষ্মণেনানুযাতো
যাতোভূস্তাতৱাচা মুনিকথিতমনুদ্ৱন্দ্ৱশান্তাধ্ৱখেদঃ।
নৃণাং ত্রাণায বাণৈর্মুনি ৱচনবলাত্তাটকাং পাটযিত্ৱা
লব্ধ্ৱাস্মাদস্ত্রজালং মুনিৱনমগমো দেৱ সিদ্ধাশ্রমাখ্যম্॥ ২ ॥

মারীচং দ্রাৱযিত্ৱা মখশিরসি শরৈরন্যরক্ষাংসি নিঘ্নন্
কল্যাং কুর্ৱন্নহল্যাং পথি পদরজসা প্রাপ্য ৱৈদেহগেহম্।
ভিন্দানশ্চান্দ্রচূডং ধনুরৱনিসুতামিন্দিরামেৱ লব্ধ্ৱা
রাজ্যং প্রাতিষ্ঠথাস্ত্ৱং ত্রিভিরপি চ সমং ভ্রাতৃৱীরৈস্সদারৈঃ॥ ৩ ॥

আরুন্ধানে রুষান্ধে ভৃগুকুলতিলকে সঙক্রময্য স্ৱতেজো
যাতে যাতোস্যযোধ্যাং সুখমিহ নিৱসন্ কান্তযা কান্তমূর্তে।
শত্রুঘ্নেনৈকদাথো গতৱতি ভরতে মাতুলস্যাধিৱাসং
তাতারব্ধোভিষেকস্তৱ কিল ৱিহতঃ কেকযাধীশপুত্র্যা॥ ৪ ॥

তাতোক্ত্যা যাতুকামো ৱনমনুজ ৱধূসংযুতশ্চাপধারঃ
পৌরানারুধ্য মার্গে গুহনিলযগতস্ত্ৱং জটাচীরধারী।
নাৱা সন্তীর্য গঙগামধি পদৱি পুনস্তং ভরদ্ৱাজমারা-
ন্নত্ৱা তদ্ৱাক্যহেতোরতিসুখমৱসশ্চিত্রকূটে গিরীন্দ্রে॥ ৫ ॥

www.prapatti.com

শ্রুত্বা পুত্রার্তিখিন্নং খলু ভরতমুখাত্ স্বর্গযাতং স্বতাতং
তপ্তো দত্বাম্বু তস্মৈ নিদধিথ ভরতে পাদুকাং মেদিনীং চ।
অত্রিং নত্বাথ গত্বা ৱনমতিৱিপুলং দণ্ডকং চণ্ডকাযং
হত্বা দৈত্যং ৱিরাধং সুগতিমকলযশ্চারু ভোঃ শারভঙ্গীম্॥ ৬ ॥

নত্বাগস্ত্যং সমস্তাশরনিকর সপত্রাকৃতিং তাপসেভ্যঃ
প্রত্যশ্রৌষীঃ প্রিযৈষী তদনু চ মুনিনা ৱৈষ্ণৱে দিৱ্যচাপে।
ব্রহ্মাস্ত্রে চাপি দত্তে পথি পিতৃসুহৃদং ৱীক্ষ্য ভূযো জটাযুং
মোদাত্ গোদাতটান্তে পরিরমসি পুরা পঞ্চৱট্যাং ৱধূট্যা॥ ৭ ॥

প্রাপ্তাযাঃ শূর্পণখ্যা মদনচলধৃতেরর্থনৈর্নিসসহাত্মা
তাং সৌমিত্রৌ ৱিসৃজ্য প্রবলতমরুষা তেন নির্লূননাসাম্।
দৃষ্টৈৱৈনাং রুষ্টচিত্তং খরমভিপতিতং দূষণং চ ত্রিমূর্ধং
ৱ্যাহিংসীরাশরানপ্যযুত সমধিকাংস্তত্ক্ষণাদক্ষতোষ্মা॥ ৮ ॥

সোদর্যা প্রোক্তৱার্তাৱিৱশদশমুখাদিষ্টমারীচমাযা-
সারঙ্গং সারসাক্ষ্যা স্পৃহিতমনুগতঃ প্রাৱধীর্বাণঘাতম্।
তন্মাযাক্রন্দনির্যাপিতভৱদনুজাং রাৱণস্তামহার্ষী-
ত্তেনার্তোপি ত্বমন্তঃ কিমপি মুদমধাস্তদ্বধোপাযলাভাত্॥ ৯ ॥

ভূযস্তন্বীং ৱিচিন্বন্নহৃত দশমুখস্তৱদ্বধূং মদ্বধেনে-
ত্যুক্তৱা যাতে জটাযৌ দিৱমথ সুহৃদঃ প্রাতনোঃ প্রেতকার্যম্।
গৃহ্ণানং তং কবন্ধং জঘনিথ শবরীং প্রেক্ষ্য পম্পাতটে ত্বং
সম্প্রাপ্তো ৱাতসূনুং ভৃশমুদিতমনাঃ পাহি ৱাতালযেশ॥ ১০ ॥

**********

www.prapatti.com